# ॥ देवर्षिकृतं गजाननस्तोत्रम् ॥

श्री गणेशाय नमः ॥
देवर्षय ऊचुः ॥
विदेहरूपं भवबन्धहारं सदा स्वनिष्ठं स्वसुखप्रदम् तम् ।
अमेयसांख्येन च लक्ष्मीशं गजाननं भक्तियुतं भजामः ॥ १॥
मुनीन्द्रवन्द्यं विधिबोधहीनं सुबुद्धिदं बुद्धिधरं प्रशान्तम् ।
विकारहीनं सकलांमकं वै गजाननं भक्तियुतं भजामः ॥ २॥
अमेय रूपं हृदि संस्थितं तं ब्रह्माऽहमेकं भ्रमनाशकारम् ।
अनादि-मध्यान्तमपाररूपं गजाननं भक्तियुतं भजामः ॥ ३॥
जगत्प्रमाणं जगदीशमेवमगम्यमाद्यं जगदादिहीनम् ।
अनात्मनां मोहप्रदं पुराणं गजाननं भक्तियुतं भजामः ॥ ४॥
न पृथ्विरूपं न जलप्रकाशनं न तेजसंस्थं न समीरसंस्थम् ।
न खे गतं पंचविभूतिहीनं गजाननं भक्तियुतं भजामः ॥ ५॥
न विश्वगं तैजसगं न प्राज्ञं समष्टि-व्यष्टिस्थ-मनन्तगं तम् ।
गुणैर्विहीनं परमार्थभूतं गजाननं भक्तियुतं भजामः ॥ ६॥
गणेशगं नैव च बिन्दुसंस्थं न देहिनं बोधमयं न ढुण्ढी ।
सुयोगहीनं प्रवदन्ति तत्स्थं गजाननं भक्तियुतं भजामः ॥ ७॥
अनागतं ग्रैवगतं गणेशं कथं तदाकारमयं वदामः ।
तथापि सर्वं प्रतिदेहसंस्थं गजाननं भक्तियुतं भजामः ॥ ८॥
यदि त्वया नाथ! धृतं न किंचित्तदा कथं सर्वमिदं भजामि ।
अतो महात्मानमचिन्त्यमेवं गजानन भक्तियुतं भजामः ॥ ९॥
सुसिद्धिदं भक्तजनस्य देवं सकामिकानामिह सौख्यदं तम् ।
अकामिकानां भवबन्धहारं गजाननं भक्तियुतं भजामः ॥ १०॥
सुरेन्द्रसेव्यं ह्यसुरैः सुसेव्यं समानभावेन विराजयन्तम् ।
अनन्तबाहु मूषकध्वजं तं गजाननं भक्तियुतं भजामः ॥ ११॥
सदा सुखानन्दमयं जले च समुद्रजे इक्षुरसे निवासम् ।
द्वन्द्वस्य यानेन च नाशरूपे गजाननं भक्तियुतं भजामः ॥ १२॥
चतुःपदार्था विविधप्रकाशस्तदेव हस्तं सुचतुर्भुजं तम् ।
अनाथनाथं च महोदरं वै गजाननं भक्तियुतं भजामः ॥ १३॥
महाखुमारूढमकालकालं विदेहयोगेन च लभ्यमानम् ।
अमायिनं मायिकमोहदं तं गजाननं भक्तियुतं भजामः ॥ १४॥
रविस्वरूपं रविभासहीनं हरिस्वरूपं हरिबोधहीनम् ।
शिवस्वरूपं शिवभासनाशं गजाननं भक्तियुतं भजामः ॥ १५॥

महेश्वरीस्थं च सुशक्तिहीनं प्रभुं परेशं परवन्द्यमेवम् ।
अचालकं चालकबीजरूपं गजाननं भक्तियुतं भजामः ॥ १६ ॥
शिवादि-देवैश्च खगैश्च वन्द्यं नरैर्लता-वृक्ष-पशुप्रमुख्यैः ।
चराऽचरैर्लोक-विहीनमेवं गजाननं भक्तियुतं भजामः ॥ १७ ॥
मनोवचोहीनतया सुसंस्थं निवृत्तिमात्रं ह्यजमव्ययं तम् ।
तथाऽपि देवं पुरसंस्थितं तं गजाननं भक्तियुतं भजामः ॥ १८ ॥
वयं सुधन्या गणपस्तवेन तथैव मर्त्यार्चनतस्तथैव ।
गणेशरूपाश्च कृतास्त्वया तं गजाननं भक्तियुतं भजामः ॥ १९ ॥
गजाख्यबीजं प्रवदन्ति वेदास्तदेव चिह्नेन च योगिनस्त्वाम् ।
गच्छन्ति तेनैव गजाननं तं गजाननं भक्तियुतं भजामः ॥ २० ॥
पुराणवेदाः शिवविष्णुकाद्यामराः शुकाद्या गणपस्तवे वै ।
विकुण्ठिताः किं च वयं स्तवामो गजाननं भक्तियुतं भजामः ॥ २१ ॥
मुद्गल उवाच ॥
एवं स्तुत्वा गणेशानं नेमुः सर्वे पुनः पुनः ।
तानुत्थाप्य वचो रम्यं गजानन उवाच ह ॥ २२ ॥
गजानन उवाच ॥
वरं ब्रूत महाभागा देवाः सर्षिगणाः परम् ।
स्तोत्रेण प्रीतिसंयुक्तो दास्यामि वांछितं परम् ॥ २३ ॥
गजाननवचः श्रुत्वा हर्षयुक्ता सुरर्षयः ।
जगुस्तं भक्तिभावेन साश्रुनेत्रा प्रजापते ॥ २४ ॥
देवर्षय ऊचुः ॥
यदि गजानन स्वामिन् प्रसन्नो वरदोऽसि मे ।
तदा भक्तिं दृढां देहि लोभहीनां त्वदीयकाम् ॥ २५ ॥
लोभासुरस्य देवेश कृता शान्तिः सुखप्रदा ।
तया गजदिदं सर्वं वरयुक्तं कृतं त्वया ॥ २६ ॥
अधुना देवदेवेश! कर्मयुक्ता द्विजातयः ।
भविष्यन्ति धरायां वै वयं स्वस्थानगास्तथा ॥ २७ ॥
स्व-स्वधर्मरताः सर्वे कृतास्त्वया गजानन! ।
अतः परं वरं ढुण्ढे याचमानः किमप्यहो! ॥ २८ ॥
यदा ते स्मरणं नाथ करिष्यामो वयं प्रभो ।
तदा संकटहीनान् वै कुरू त्वं नो गजानन! ॥ २९ ॥
एवमुक्त्वा प्रणेमुस्तं गजाननमनामयम् ।
तानुवाच सप्रीत्यात्मा भक्ताधीनः स्वभावतः ॥ ३० ॥
गजानन उवाच ॥
यद्यच्च प्रार्थितं देवा मुनयः सर्वमंजसा ।
भविष्यति न सन्देहो मत्स्मृत्या सर्वदा हि वः ॥ ३१ ॥

भवत्कृतमदीयं वै स्तोत्रं सर्वत्र सिद्धिदम् ।
भविष्यति विशेषेण मम भक्ति-प्रदायकम् ॥ ३२॥
पुत्र-पौत्र-प्रदं पूर्णं धन-धान्य-प्रवर्धनम् ।
सर्वसम्पत्करं देवाः पठनाच्छ्रवणान्नृणाम् ॥ ३३॥
मारणोच्चाटनादीनि नश्यन्ति स्तोत्रपाठतः ।
परकृत्यं च विप्रेन्द्रा अशुभं नैव बाधते ॥ ३४॥
संग्रामे जयदं चैव यात्राकाले फलप्रदम् ।
शत्रूच्चाटनादिषु च प्रशस्तं तद् भविष्यति ॥ ३५॥
कारागृहगतस्यैव बन्धनाशकरं भवेत् ।
असाध्यं साधयेत् सर्वमनेनैव सुरर्षयः ॥ ३६॥
एकविंशति वारं तत् चैकविंशद्दिनावधिम् ।
प्रयोगं यः करोत्येव सर्वसिद्धियुतो भवेत् ॥ ३७॥
धर्माऽर्थकाम-मोक्षाणां ब्रह्मभूतस्य दायकम् ।
भविष्यति न सन्देहः स्तोत्रं मद्भक्तिवर्धनम् ॥ ३८॥
एवमुक्त्वा गणाधीशस्तत्रैवान्तरधीयत ॥
इति मुद्गलपुराणान्तर्गतं गजाननस्तोत्रं सम्पूर्णम् ॥

proofread by Karthik Chandan.P (kardan5380@yahoo.com)
Amith K Nagaraj (amithkn@rediffmail.com)

---

Please send corrections to sanskrit@cheerful.com
Last updated April 5, 2004